347. Om javāpuṣpapriyāyai namaḥ
348. Om janāyai namaḥ
349. Om jalasthāyai namaḥ
350. Om jagaviṣayāyai namaḥ
351. Om jarātītāyai namaḥ
352. Om jalasthitāyai namaḥ
353. Om jīvahāyai namaḥ
354. Om jīvakanyāyai namaḥ
355. Om janārdanakumārikāyai namaḥ
356. Om jatukāyai namaḥ
357. Om jalapūjyāyai namaḥ
358. Om jagannāthādikāminyai namaḥ
359. Om jīrṇāṅgyai namaḥ
360. Om jīrṇahīnāyai namaḥ
361. Om jīmūtātyanta-śobhitāyai namaḥ
362. Om jāmātre namaḥ
363. Om jayadāyai namaḥ
364. Om jyeṣṭhāyai namaḥ
365. Om jṛmbhaṇāstrādidhāriṇyai namaḥ
366. Om jaghanyāyai namaḥ
367. Om jārajāprītāyai namaḥ
368. Om jagadānandavarddhinyai namaḥ
369. Om jamalārjuna-darpaghnyai namaḥ
370. Om jamalārjunabhañjinyai namaḥ
371. Om jayitryai namaḥ
372. Om jagadānandāyai namaḥ
373. Om jāmalollāsa-siddhidāyai

namaḥ
374. Om japamālāyai namaḥ
375. Om jāpyasiddhyai namaḥ
376. Om japayajñaprakāśinyai namaḥ
377. Om jāmbuvatyai namaḥ
378. Om jāmbavatakanyakāyai namaḥ
379. Om janavāyai namaḥ
380. Om japāyai namaḥ
381. Om javāhantryai namaḥ
382. Om jagadbuddhyai namaḥ
383. Om jagatkartre namaḥ
384. Om jagadgatyai namaḥ
385. Om jananyai namaḥ
386. Om jīvanyai namaḥ
387. Om jāyāyai namaḥ
388. Om jaganmātāyai namaḥ
389. Om janeśvaryai namaḥ
390. Om jhaṅkalāyai namaḥ
391. Om jhaṅkamadhyasthāyai namaḥ
392. Om jhaṇatkārasvarūpiṇyai namaḥ
393. Om jhaṇatjhaṇadvahni-rūpāyai namaḥ
394. Om jhananāyai namaḥ
395. Om jhandarīśvaryai namaḥ
396. Om jhaṭitākṣāyai namaḥ
397. Om jharāyai namaḥ
398. Om jhañjhāyai namaḥ
399. Om jharjharāyai namaḥ
400. Om jharakanyakāyai namaḥ
401. Om jhaṇatkāryai namaḥ
402. Om jhanāyai namaḥ
403. Om jhannāyai namaḥ
404. Om jhakāramālayāvṛtāyai namaḥ
405. Om jhaṅkaryai namaḥ
406. Om jharjharyai namaḥ
407. Om jhallyai namaḥ
408. Om jhalveśvaranivāsinyai namaḥ
409. Om ñakāryai namaḥ
410. Om ñakirātyai namaḥ
411. Om ñakārabījamālinyai namaḥ
412. Om ñanayo'ntāyai namaḥ
413. Om ñakārāntāyai namaḥ
414. Om ñakāraparameśvaryai namaḥ
415. Om ñāntabījapuṭākārāyai namaḥ
416. Om ñekalāyai namaḥ
417. Om ñaikagāminyai namaḥ
418. Om ñaikanelāyai namaḥ
419. Om ñasvarūpāyai namaḥ
420. Om ñahārāyai namaḥ
421. Om ñaharītakyai namaḥ
422. Om ṭunṭunyai namaḥ
423. Om ṭaṅkahastāyai namaḥ
424. Om ṭāntavargāyai namaḥ
425. Om ṭalāvatyai namaḥ
426. Om ṭapalāyai namaḥ
427. Om ṭāpabālākhyāyai namaḥ
428. Om ṭaṅkāradhvanirūpiṇyai namaḥ
429. Om ṭalātyai namaḥ
430. Om ṭākṣarātītāyai namaḥ
431. Om ṭitkārādikumārikāyai namaḥ
432. Om ṭaṅkāstradhāriṇyai namaḥ
433. Om ṭānāyai namaḥ
434. Om ṭāmoṭārṇalabhāṣiṇyai namaḥ
435. Om ṭaṅkāranidhanāyai namaḥ
436. Om ṭākāyai namaḥ
437. Om ṭaṅkāraṇavimohinyai

namaḥ
438. Om ṭaṅkāradhvanimohāyai namaḥ
439. Om ṭiṭikhecharanādinyai namaḥ
440. Om ṭhaṭhaṅkāryai namaḥ
441. Om ṭhāṭharūpāyai namaḥ
442. Om ṭhakārabījakāraṇāyai namaḥ
443. Om ḍamarūpriyavādyāyai namaḥ
444. Om ḍāmarasthāyai namaḥ
445. Om ḍabījikāyai namaḥ
446. Om ḍāntavargāyai namaḥ
447. Om ḍamarukāyai namaḥ
448. Om ḍarasthāyai namaḥ
449. Om ḍoraḍāmarāyai namaḥ
450. Om ḍavargatāyai namaḥ
451. Om ḍalātītāyai namaḥ
452. Om ḍakārakeśvaryai namaḥ
453. Om ḍutāyai namaḥ
454. Om ḍhārddhanārīśvarāyai namaḥ
455. Om ḍhāmāyai namaḥ
456. Om ḍhakkāryai namaḥ
457. Om ḍhalanāyai namaḥ
458. Om ḍhalāyai namaḥ
459. Om ḍhakesthāyai namaḥ
460. Om ḍheśvarasutāyai namaḥ
461. Om ḍhemanābhāvāyai namaḥ
462. Om ḍhonanāyai namaḥ
463. Om ṇomākānteśvaryai namaḥ
464. Om ṇāntavargasthāyai namaḥ
465. Om ṇatunāvatyai namaḥ
466. Om ṇanomāyai namaḥ
467. Om ṇāṅkakalyāṇyai namaḥ
468. Om ṇākṣavīṇākṣabījikāyai namaḥ
469. Om tulasyai namaḥ
470. Om tantusūkṣmākhyāyai namaḥ
471. Om tāralyāyai namaḥ
472. Om tailagandhikāyai namaḥ
473. Om tapasyāyai namaḥ
474. Om tāpasasutāyai namaḥ
475. Om tāriṇyai namaḥ
476. Om taruṇyai namaḥ
477. Om talāyai namaḥ
478. Om tantrasthāyai namaḥ
479. Om tārakabrahmasvarūpāyai namaḥ
480. Om tantumadhyagāyai namaḥ
481. Om tālabhakṣāyai namaḥ
482. Om tridhāmūrtyai namaḥ
483. Om tārakāyai namaḥ
484. Om tailabhakṣikāyai namaḥ
485. Om tārogrāyai namaḥ
486. Om tālamālāyai namaḥ
487. Om takarāyai namaḥ
488. Om tintiḍīpriyāyai namaḥ
489. Om tapase namaḥ
490. Om tālasandarbhāyai namaḥ
491. Om tarjayantyai namaḥ
492. Om tokāchārāyai namaḥ
493. Om talodvegāyai namaḥ
494. Om takṣakāyai namaḥ
495. Om takṣakapriyāyai namaḥ
496. Om takṣakālaṅkṛtāyai namaḥ
497. Om toṣāyai namaḥ
498. Om tāvadrūpāyai namaḥ
499. Om talapriyāyai namaḥ
500. Om talāstradhāriṇyai namaḥ
501. Om tāpāyai namaḥ
502. Om tapasāṃ phaladāyinyai namaḥ
503. Om talaprahāraniratāyai namaḥ

504. Om talāriganaṇanāśinyai namaḥ
505. Om tūlāyai namaḥ
506. Om taulyai namaḥ
507. Om tolakāyai namaḥ
508. Om talasthāyai namaḥ
509. Om talapālikāyai namaḥ
510. Om taruṇāyai namaḥ
511. Om taptabuddhisthāyai namaḥ
512. Om taptogradhāriṇyai namaḥ
513. Om tapāyai namaḥ
514. Om tantraprakāśakaraṇyai namaḥ
515. Om tantrārthadāyinyai namaḥ
516. Om tuṣāyai namaḥ
517. Om tuṣārakiraṇāṅgyai namaḥ
518. Om tuṣārāṃśusamaprabhāyai namaḥ
519. Om tailamārgābhisūtāyai namaḥ
520. Om tantrasiddhiphalapradāyai namaḥ
521. Om tāmraparṇāyai namaḥ
522. Om tāmrakeśāyai namaḥ
523. Om tāmrapātrapriyāyai namaḥ
524. Om tamāyai namaḥ
525. Om tamoguṇapriyāyai namaḥ
526. Om tolāyai namaḥ
527. Om takṣakārinivāriṇyai namaḥ
528. Om toṣayuktāyai namaḥ
529. Om tamāyāchyai namaḥ
530. Om tamaṣo'heśvarapriyāyai namaḥ
531. Om tulanāyai namaḥ
532. Om tulyaruchirāyai namaḥ
533. Om tulyabuddhyai namaḥ
534. Om tridhāmatyai namaḥ
535. Om takrabhakṣāyai namaḥ
536. Om tālasiddhyai namaḥ
537. Om tatrasthāyai namaḥ
538. Om tatragāminyai namaḥ
539. Om talayāyai namaḥ
540. Om tailabhāyai namaḥ
541. Om tālyai namaḥ
542. Om tantragopanatatparāyai namaḥ
543. Om tantramantraprakāśāyai namaḥ
544. Om triśareṇusvarūpiṇyai namaḥ
545. Om triṃśadarthapriyāyai namaḥ
546. Om tuṣṭāyai namaḥ
547. Om tuṣṭyai namaḥ
548. Om tuṣṭajanapriyāyai namaḥ
549. Om thakārakūṭadaṇḍīśāyai namaḥ
550. Om thadaṇḍīśapriyā'thavāyai namaḥ
551. Om thakārākṣararūḍhāṅgyai namaḥ
552. Om thāntavargāyai namaḥ
553. Om thakārikāyai namaḥ
554. Om thāntāyai namaḥ
555. Om thamīśvaryai namaḥ
556. Om thākāyai namaḥ
557. Om thakārabījamālinyai namaḥ
558. Om dakṣadāmapriyāyai namaḥ
559. Om doṣāyai namaḥ
560. Om doṣajālavanāśritāyai namaḥ
561. Om daśāyai namaḥ
562. Om daśanaghorāyai namaḥ
563. Om devyai namaḥ
564. Om dāsapriyāyai namaḥ
565. Om dayāyai namaḥ
566. Om daityahantrīparāyai namaḥ

567. Om daityāyai namaḥ
568. Om daityānāṃ mardinyai namaḥ
569. Om diśāyai namaḥ
570. Om dāntāyai namaḥ
571. Om dāntapriyāyai namaḥ
572. Om dāsāyai namaḥ
573. Om dāmanāyai namaḥ
574. Om dīrghakeśikāyai namaḥ
575. Om daśanāyai namaḥ
576. Om darīgrahanivāsinyai namaḥ
577. Om devamātāyai namaḥ
578. Om durlabhāyai namaḥ
579. Om dīrghāṅgāyai namaḥ
580. Om dāsakanyakāyai namaḥ
581. Om daśanaśryai namaḥ
582. Om dīrghanetrāyai namaḥ
583. Om dīrghanāsāyai namaḥ
584. Om doṣahāyai namaḥ
585. Om damayantyai namaḥ
586. Om dalasthāyai namaḥ
587. Om dveṣyahantryai namaḥ
588. Om daśasthitāyai namaḥ
589. Om daiśeṣikāyai namaḥ
590. Om diśigatāyai namaḥ
591. Om daśanāstravināśinyai namaḥ
592. Om dāridryahāyai namaḥ
593. Om daridrasthāyai namaḥ
594. Om daridradhanadāyinyai namaḥ
595. Om danturāyai namaḥ
596. Om deśabhāṣāyai namaḥ
597. Om deśasthāyai namaḥ
598. Om deśanāyikāyai namaḥ



599. Om dveṣarūpāyai namaḥ
600. Om dveṣahantryai namaḥ
601. Om dveṣārigaṇamohinyai namaḥ
602. Om dāmodarasthāyai namaḥ
603. Om dalanāyai namaḥ
604. Om dalānāṃ baladāyinyai namaḥ
605. Om digdarśanāyai namaḥ
606. Om darśanasthāyai namaḥ
607. Om darśanapriyavādinyai namaḥ
608. Om dāmodarapriyāyai namaḥ
609. Om dāntāyai namaḥ
610. Om dāmodarakalevarāyai namaḥ
611. Om drāviṇyai namaḥ
612. Om draviṇyai namaḥ
613. Om dakṣāyai namaḥ
614. Om dakṣakanyāyai namaḥ
615. Om daladṛḍhāyai namaḥ
616. Om dṛḍhāsanāyai namaḥ
617. Om dāsaśaktyai namaḥ
618. Om dvandvayuddha-prakāśinyai namaḥ
619. Om dadhipriyāyai namaḥ
620. Om dadhisthāyai namaḥ
621. Om dadhimaṅgalakāriṇyai namaḥ
622. Om darpahāyai namaḥ
623. Om darpadāyai namaḥ
624. Om dṛptāyai namaḥ
625. Om darbhapuṇyapriyāyai namaḥ
626. Om dadhyai namaḥ
627. Om darbhasthāyai namaḥ
628. Om drupadasutāyai namaḥ
629. Om draupadyai namaḥ
630. Om drupadapriyāyai namaḥ
631. Om dharmachintāyai namaḥ
632. Om dhanādhyakṣāyai namaḥ
633. Om dhaneshvaravarapradāyai namaḥ
634. Om dhanahāyai namaḥ
635. Om dhanadāyai namaḥ
636. Om dhanvyai namaḥ
637. Om dhanurhastāyai namaḥ
638. Om dhanupriyāyai namaḥ
639. Om dharaṇyai namaḥ
640. Om dhairyarūpāyai namaḥ
641. Om dhanasthāyai namaḥ
642. Om dhanamohinyai namaḥ
643. Om dhorāyai namaḥ
644. Om dhīrapriyādhārāyai namaḥ
645. Om dharādhāraṇatatparāyai namaḥ
646. Om dhānyadāyai namaḥ
647. Om dhānyabījāyai namaḥ
648. Om dharmādharma-svarūpiṇyai namaḥ
649. Om dhārāyai namaḥ
650. Om dharasthāyai namaḥ
651. Om dhanyāyai namaḥ
652. Om dharmapuñjanivāsinyai namaḥ
653. Om dhanāḍhya-priyakanyāyai namaḥ
654. Om dhanyaloka-niṣevitāyai namaḥ
655. Om dharmārthakāma-mokṣāṅgyai namaḥ
656. Om dharmārthakāma-mokṣadāyai namaḥ
657. Om dharādharāyai namaḥ
658. Om dhuroṇāyai namaḥ
659. Om dhavalāyai namaḥ
660. Om dhavalāmukhyai namaḥ
661. Om dharāyai namaḥ

662. Om dhāmarūpāyai namaḥ
663. Om dhruvāyai namaḥ
664. Om dhrauvyāyai namaḥ
665. Om dhruvapriyāyai namaḥ
666. Om dhaneśyai namaḥ
667. Om dhāraṇākhyāyai namaḥ
668. Om dharmanindāvināśinyai namaḥ
669. Om dharmatejomayyai namaḥ
670. Om dharmyāyai namaḥ
671. Om dhairyāgrabharga-mohinyai namaḥ
672. Om dhāraṇāyai namaḥ
673. Om dhautavasanāyai namaḥ
674. Om dhattūraphalabhoginyai namaḥ
675. Om nārāyaṇyai namaḥ
676. Om narendrasthāyai namaḥ
677. Om nārāyaṇakalevarāyai namaḥ
678. Om naranārāyaṇaprītāyai namaḥ
679. Om nītāyai namaḥ
680. Om nayanamohitāyai namaḥ
681. Om nityāyai namaḥ
682. Om nāpitakanyāyai namaḥ
683. Om nayanasthāyai namaḥ
684. Om narapriyāyai namaḥ
685. Om nāmnyai namaḥ
686. Om nāmapriyāyai namaḥ
687. Om nārāyai namaḥ
688. Om nārāyaṇasutāyai namaḥ
689. Om narāyai namaḥ
690. Om navīnanāyakaprītāyai namaḥ
691. Om navyāyai namaḥ
692. Om navaphalapriyāyai namaḥ
693. Om navīnakusumaprītāyai namaḥ
694. Om navīnāyai namaḥ
695. Om nīrajānujāyai namaḥ
696. Om nāryai namaḥ
697. Om nimbasthitānandāyai namaḥ
698. Om nandinyai namaḥ
699. Om nandakārikāyai namaḥ
700. Om navapuṣpamahāprītāyai namaḥ
701. Om navapuṣpasugandhikāyai namaḥ
702. Om nandanasthāyai namaḥ
703. Om nandakanyāyai namaḥ
704. Om nandamokṣapradāyinyai namaḥ
705. Om namitāyai namaḥ
706. Om nāmabhedāyai namaḥ
707. Om nāmnārttavanamohinyai namaḥ
708. Om navabuddhipriyānekāyai namaḥ
709. Om nākasthāyai namaḥ
710. Om nāmakanyakāyai namaḥ
711. Om nindāhīnāyai namaḥ
712. Om navollāsāyai namaḥ
713. Om nākasthānapradāyinyai namaḥ
714. Om nimbavṛkṣasthitāyai namaḥ
715. Om nimbāyai namaḥ
716. Om nānāvṛkṣanivāsinyai namaḥ
717. Om nāśyātītāyai namaḥ
718. Om nīlavarṇāyai namaḥ
719. Om nīlāyai namaḥ
720. Om nīlasarasvatyai namaḥ
721. Om nabhaḥsthāyai namaḥ
722. Om nāyakaprītāyai namaḥ
723. Om nāyakapriyakāminyai namaḥ
724. Om naivavarṇāyai namaḥ
725. Om nirāhārāyai namaḥ
726. Om nirohāyai namaḥ

727. Om nirajapriyāyai namaḥ
728. Om nimnanābhi-priyākārāyai namaḥ
729. Om narendrahastapūjitāyai namaḥ
730. Om nalasthitāyai namaḥ
731. Om nalaprītāyai namaḥ
732. Om nalarājakumārikāyai namaḥ
733. Om pareśvaryai namaḥ
734. Om parānandāyai namaḥ
735. Om parāparavibhedikāyai namaḥ
736. Om paramāyai namaḥ
737. Om parachakrasthāyai namaḥ
738. Om pārvatyai namaḥ
739. Om parvatapriyāyai namaḥ
740. Om parameśyai namaḥ
741. Om parvamālāyai namaḥ
742. Om puṣpamālyapriyāyai namaḥ
743. Om parāparāyai namaḥ
744. Om priyāyai namaḥ
745. Om prītidātryai namaḥ
746. Om prītyai namaḥ
747. Om prathamakāminyai namaḥ
748. Om prathamāyai namaḥ
749. Om prītāyai namaḥ
750. Om puṣpagandhapriyāyai namaḥ
751. Om parāyai namaḥ
752. Om pauṣyyai namaḥ
753. Om pānaratāyai namaḥ
754. Om pīnāyai namaḥ
755. Om pīnastanasuśobhanāyai namaḥ
756. Om paramānaratāyai namaḥ
757. Om puṃsāṃ pāśahastāyai namaḥ
758. Om paśupriyāyai namaḥ
759. Om palalānanda-rasikāyai namaḥ
760. Om palāladhūmarūpiṇyai namaḥ
761. Om palāśapuṣpa-saṅkāśāyai namaḥ
762. Om palāśapuṣpa-mālinyai namaḥ
763. Om premabhūtāyai namaḥ
764. Om padmamukhyai namaḥ
765. Om padmarāgasumālinyai namaḥ
766. Om padmamālāyai namaḥ
767. Om pāpaharāyai namaḥ
768. Om patipremavilāsinyai namaḥ
769. Om pañchānanamanohāryai namaḥ
770. Om pañchavaktraprakāśinyai namaḥ
771. Om phalamūlāśanāyai namaḥ
772. Om phālyai namaḥ
773. Om phaladāyai namaḥ
774. Om phālgunapriyāyai namaḥ
775. Om phalanāthapriyāyai namaḥ
776. Om phallyai namaḥ
777. Om phalgukanyāyai namaḥ
778. Om phalonmukhyai namaḥ
779. Om phetkārītantramukhyāyai namaḥ
780. Om phetkāragaṇapūjitāyai namaḥ
781. Om pheravyai namaḥ
782. Om pheravasutāyai namaḥ
783. Om phalabhogodbhavāyai namaḥ
784. Om phalāyai namaḥ
785. Om phalapriyāyai namaḥ
786. Om phalāśaktāyai namaḥ

787. Om phālgunānanda-dāyinyai namaḥ
788. Om phālabhogottarāyai namaḥ
789. Om phelāyai namaḥ
790. Om phulāmbhojanivāsinyai namaḥ
791. Om vasudevagṛhasthāyai namaḥ
792. Om vāsavyai namaḥ
793. Om vīrapūjitāyai namaḥ
794. Om viṣabhakṣāyai namaḥ
795. Om budhasutāyai namaḥ
796. Om bluṅkāryai namaḥ
797. Om blūvarapradāyai namaḥ
798. Om brāhmyai namaḥ
799. Om bṛhaspatisutāyai namaḥ
800. Om vāchaspativarapradāyai namaḥ
801. Om vedāchārāyai namaḥ
802. Om vedyaparāyai namaḥ
803. Om vyāsavaktrasthitāyai namaḥ
804. Om vibhāyai namaḥ
805. Om bodhajñāyai namaḥ
806. Om vauṣaḍākhyāyai namaḥ
807. Om vaṃśīvandanapūjitāyai namaḥ
808. Om vajrakāntāyai namaḥ
809. Om vajragatyai namaḥ
810. Om badaryai namaḥ
811. Om vaṃśavivarddhinyai namaḥ
812. Om bhāratyai namaḥ
813. Om bhavaraśrīdāyai namaḥ
814. Om bhavapatnyai namaḥ
815. Om bhavātmajāyai namaḥ
816. Om bhavānyai namaḥ
817. Om bhāvinyai namaḥ
818. Om bhīmāyai namaḥ
819. Om bhiṣagbhāryāyai namaḥ
820. Om bhuvi sthitāyai namaḥ
821. Om bhūrbhuvaḥsvaḥ-svarūpāyai namaḥ
822. Om bhṛśārttāyai namaḥ
823. Om bhekanādinyai namaḥ
824. Om bhautyai namaḥ
825. Om bhaṅgapriyāyai namaḥ
826. Om bhaṅgabhaṅgahāyai namaḥ
827. Om bhaṅgahāriṇyai namaḥ
828. Om bhartāyai namaḥ
829. Om bhagavatyai namaḥ
830. Om bhāgyāyai namaḥ
831. Om bhagīrathanamaskṛtāyai namaḥ
832. Om bhagamālāyai namaḥ
833. Om bhūtanātheśvaryai namaḥ
834. Om bhārgavapūjitāyai namaḥ
835. Om bhṛguvaṃśāyai namaḥ
836. Om bhītiharāyai namaḥ
837. Om bhūmyai namaḥ
838. Om bhujagahāriṇyai namaḥ
839. Om bhālachandrāyai namaḥ
840. Om bhalvabālāyai namaḥ
841. Om bhavabhūtyai namaḥ
842. Om bhairavyai namaḥ
843. Om makarasthāyai namaḥ
844. Om mattagatyai namaḥ
845. Om madamattāyai namaḥ
846. Om madapriyāyai namaḥ
847. Om madirāṣṭādaśabhujāyai namaḥ
848. Om madirāyai namaḥ
849. Om mattagāminyai namaḥ
850. Om madirāsiddhidāyai namaḥ
851. Om madhyāyai namaḥ
852. Om madāntargatisiddhidāyai

namaḥ
853. Om mīnabhakṣāyai namaḥ
854. Om mīnarūpāyai namaḥ
855. Om mudrāyai namaḥ
856. Om mudgapriyāgatyai namaḥ
857. Om muṣalāyai namaḥ
858. Om muktidāyai namaḥ
859. Om mūrttāyai namaḥ
860. Om mūkīkaraṇatatparāyai namaḥ
861. Om mṛṣārttāyai namaḥ
862. Om mṛgatṛṣṇāyai namaḥ
863. Om meṣabhakṣaṇatatparāyai namaḥ
864. Om maithunānandasiddhyai namaḥ
865. Om maithunānalasiddhidāyai namaḥ
866. Om mahālakṣmyai namaḥ
867. Om mahendrapīṭhanāyikāyai namaḥ
868. Om manaḥsthāyai namaḥ
869. Om mādhavyai namaḥ
870. Om mukhyāyai namaḥ
871. Om mahādevamanoramāyai namaḥ
872. Om yaśodāyai namaḥ
873. Om yāchanāyai namaḥ
874. Om yāsyāyai namaḥ
875. Om yamarājapriyāyai namaḥ
876. Om yamāyai namaḥ
877. Om yaśorāśivibhūṣāṅgyai namaḥ
878. Om yatipremakalāvatyai namaḥ
879. Om ramaṇyai namaḥ
880. Om rāmapatnyai namaḥ
881. Om ripuhāyai namaḥ
882. Om rītimadhyagāyai namaḥ
883. Om rudrāṇyai namaḥ
884. Om rūpadāyai namaḥ
885. Om rūpāyai namaḥ
886. Om rūpasundaradhāriṇyai namaḥ
887. Om retaḥsthāyai namaḥ
888. Om retasaprītāyai namaḥ
889. Om retaḥsthānanivāsinyai namaḥ
890. Om rendrādevasutāredāyai namaḥ
891. Om ripuvargāntakapriyāyai namaḥ
892. Om romāvalīndrajananyai namaḥ
893. Om romakūpajagatpatyai namaḥ
894. Om raupyavarṇāyai namaḥ
895. Om raudravarṇāyai namaḥ
896. Om raupyālaṅkārabhūṣaṇāyai namaḥ
897. Om raṅgiṇāyai namaḥ
898. Om raṅgarāgasthāyai namaḥ
899. Om raṇavahnikuleśvaryai namaḥ
900. Om raktabhakṣāyai namaḥ
901. Om raktavarṇāyai namaḥ
902. Om lakṣmyai namaḥ
903. Om lāṅgalahastāyai namaḥ
904. Om lāṅgalyai kulakāminyai namaḥ
905. Om lipirūpāyai namaḥ
906. Om līḍhapādāyai namaḥ
907. Om latātantusvarūpiṇyai namaḥ
908. Om limpatyai namaḥ
909. Om lelihāyai namaḥ
910. Om lolāyai namaḥ
911. Om lomaśapriyasiddhidāyai

namaḥ
912. Om laukikyai namaḥ
913. Om laukikīsiddhyai namaḥ
914. Om laṅkānāthakumārikāyai namaḥ
915. Om lakṣmaṇāyai namaḥ
916. Om lakṣmīhīnāyai namaḥ
917. Om lapriyāyai namaḥ
918. Om lārṇamadhyagāyai namaḥ
919. Om vivasāyai namaḥ
920. Om vasanāveśāyai namaḥ
921. Om vivasyakulakanyakāyai namaḥ
922. Om vātasthāyai namaḥ
923. Om vātarūpāyai namaḥ
924. Om velamadhyanivāsinyai namaḥ
925. Om vibhūtidāyai namaḥ
926. Om vindhyavāsinyai namaḥ
927. Om śmaśānabhūmi-madhyasthāyai namaḥ
928. Om śmaśānasādhanapriyāyai namaḥ
929. Om śavasthā parasiddh-yarthyai namaḥ
930. Om śavavakṣasyai namaḥ
931. Om śobhitāyai namaḥ
932. Om śaraṇāgatapālyāyai namaḥ
933. Om śivakanyāyai namaḥ
934. Om śivapriyāyai namaḥ
935. Om śāradāyai namaḥ
936. Om ṣaṭchakrabhedinyai namaḥ
937. Om ṣoḍhānyāsajāla-dṛḍhānanāyai namaḥ
938. Om sandhyāyai namaḥ
939. Om sarasvatyai namaḥ
940. Om sūkṣmāyai namaḥ
941. Om sūryagāyai namaḥ
942. Om satyai namaḥ
943. Om sutuṇḍāyai namaḥ
944. Om svarabījāntāyai namaḥ
945. Om siddhidātryai namaḥ
946. Om haripriyāyai namaḥ
947. Om harahālālāvaṇyasthāyai namaḥ
948. Om hariveśādisiddhidāyai namaḥ
949. Om kṣamāyai namaḥ
950. Om kṣudhāyai namaḥ
951. Om kṣetrajñāyai namaḥ
952. Om kṣārāmlatikta-madhyagāyai namaḥ
953. Om ambikāyai namaḥ
954. Om aparājitāyai namaḥ
955. Om ādyāyai namaḥ
956. Om indrapriyāyai namaḥ
957. Om īśāyai namaḥ
958. Om umāyai namaḥ
959. Om ūḍhāyai namaḥ
960. Om ṛtupriyāyai namaḥ
961. Om ekādaśīvratasthāyai namaḥ
962. Om aindryai namaḥ
963. Om oṣadhisiddhidāyai namaḥ
964. Om aupakāryai namaḥ
965. Om aṃśarūpāyai namaḥ
966. Om astrabījaprakāśinyai namaḥ
967. Om durgāyai namaḥ
968. Om durgārtiśamanyai namaḥ
969. Om durgāpadvinivāriṇyai namaḥ
970. Om durgamachchhedinyai namaḥ
971. Om durgasādhinyai namaḥ
972. Om durganāśinyai namaḥ
973. Om durgatoddhāriṇyai



namaḥ
974. Om durganihantryai namaḥ
975. Om durgamāpahāyai namaḥ
976. Om durgamajñānadāyai namaḥ
977. Om durgadaityaloka-davānalāyai namaḥ
978. Om durgamāyai namaḥ
979. Om durgamālokāyai namaḥ
980. Om durgamātma-svarūpiṇyai namaḥ
981. Om durgamārgapradāyai namaḥ
982. Om durgamavidyāyai namaḥ
983. Om durgamāśritāyai namaḥ
984. Om durgamajñāna-saṃsthānāyai namaḥ
985. Om durgamadhyāna-bhāsinyai namaḥ
986. Om durgamohāyai namaḥ
987. Om durgamagāyai namaḥ
988. Om durgamārtha-svarūpiṇyai namaḥ
989. Om durgamāsura-saṃhantryai namaḥ
990. Om durgamāyudha-dhāriṇyai namaḥ
991. Om durgamāṅgyai namaḥ
992. Om durgamatāyai namaḥ
993. Om durgamyāyai namaḥ
994. Om durgameśvaryai namaḥ
995. Om durgabhīmāyai namaḥ
996. Om durgabhāmāyai namaḥ
997. Om durgabhāyai namaḥ
998. Om durgadāriṇyai namaḥ
999. Om kātyāyanyai namaḥ
1000. Om kanyākumāryai namaḥ

Om śāntiḥ śāntiḥ śāntiḥ. Hariḥ om



Pūrṇahuti

Om pūrṇamadaḥ pūrṇamidaṃ pūrṇāt pūrnamudachyate.
Pūrṇasya pūrnamādāya pūrṇamevāvaśiṣyate.

Om śāntiḥ śāntiḥ śāntiḥ. Hariḥ om

Satyānanda Gāyatrī

Om paramahaṃsāvadhūtāya vidmahe satyānandāya dhīmāhi
tanno guruḥ prachodayāt.

Om śāntiḥ śāntiḥ śāntiḥ. Hariḥ om

Devīrahasya-tantroktaṃ Śrī Durgākavacheśvaram

1. Om me pātu śiro durgā hrīṃ me pātu lalāṭakam.
   Duṃ netre'ṣṭākṣarā pātu chakrī pātu śrutī mama.

2. Mukhaṃ gaṇḍau cha me pātu deveśī raktakuṇḍalā.
   Vāyurnāsāṃ sadā pātu raktabījaniṣūdinī.

3. Lavaṇaṃ pātu me chauṣṭhau chāmuṇḍā chaṇḍaghātinī.
   Bhekī bījaṃ sadā pātu dantānme raktadantikā.

4. Om hrīṃ śrīṃ pātu me kaṇṭhaṃ nīlakaṇṭhāṅkavāsinī.
   Om aiṃ klīṃ pātu me skandhau skandamātā maheśvarī.

5. Om sauḥ klīṃ me pātu bāhū deveśī bagalāmukhī.
   Aiṃ śrīṃ hrīṃ pātu me hastau śivāśataninādinī.

6. Sauḥ aiṃ hrīṃ pātu me vakṣo devatā vindhyavāsinī.
   Om hrīṃ śrīṃ klīṃ pātu kukṣiṃ mama mātaṅginī parā.

7. Śrīṃ hrīṃ aiṃ pātu me pārśvau himāchalanivāsinī.
   Om strīṃ hūṃ aiṃ pātu pṛṣṭhaṃ mama durgatihāriṇī.

8. Om krīṃ hūṃ pātu me nābhiṃ devī nārāyaṇī sadā.
   Om aiṃ klīṃ sauḥ sadā pātu kaṭiṃ kātyāyanī mama.

9. Om hrīṃ śrīṃ hrīṃ pātu śiśnaṃ devī śrībhagamālinī.
   Aiṃ sauḥ klīṃ sauḥ pātu guhyaṃ guhyakeśvarapūjitā.

10. Om aiṃ hrīṃ śrīṃ hsauḥ pāyādūrū mama manonmanā.
    Om juṃ saḥ sauḥ pātu jānū jagadīśvarapūjitā.

11. Om aiṃ klīṃ me pātu jaṅghe meruparvatavāsinī.
    Om hrīṃ śrīṃ gīṃ sadā pātu gulphau mama gaṇeśvarī.

12. Om hrīṃ duṃ pātu me pādau pārvatī ṣoḍaśākṣarī.
    Pūrve māṃ pātu brahmāṇī vahnau māṃ vaiṣṇavī tathā.

13. Dakṣiṇe chaṇḍikā pātu nairṛtye nārasiṃhikā.
    Paśchime pātu vārāhī vāyavye mā'parājitā.

14. Uttare pātu kaumārī chaiśānyāṃ śāmbhavī tathā.
    Ūrdhvaṃ durgā sadā pātu pātvadhastāchchhivā sadā.

15. Prabhāte tripurā pātu madhyāhne māṃ maheśvarī.
Sāyaṃ sarasvatī pātu niśīthe chhinnamastakā.

16. Niśānte bhairavī pātu sarvadā bhadrakālikā.
Agnerambā cha māṃ pātu jalānmāṃ jagadambikā.

17. Vāyormāṃ pātu vāgdevī vanād vanajalochanā.
Siṃhāt siṃhāsanā pātu sarpāt sarpāntakāsanā.

18. Rogānmāṃ rājamātaṅgī bhūtād bhūteśavallabhā.
Yakṣebhyo yakṣiṇī pātu rakṣobhyo rākṣasāntakā.

19. Bhūtapretapiśāchebhyaḥ sumukhī pātu māṃ sadā.
Sarvatra sarvadā pātu om hrīṃ durgā navākṣarā.

Om śāntiḥ śāntiḥ śāntiḥ. Hariḥ om



Āditya-hṛdayam

1. Rāma rāma mahābāho sṛṇu guhyaṃ sanātanam.
   Yena sarvānarīn vatsa samare vijayiṣyase.
2. Ādityahṛdayaṃ puṇyaṃ sarvaśatruvināśanam.
   Jayāvahaṃ japaṃ nityamakṣayaṃ paramaṃ śivam.
3. Sarvamaṅgala-māṅgalyaṃ sarvapāpapraṇāśanam.
   Chintāśoka-praśamanamāyurvardhanamuttamam.
4. Raśmimantaṃ samudyantaṃ devāsuranamaskṛtam.
   Pūjayasva vivasvantaṃ bhāskaraṃ bhuvaneśvaram.
5. Sarvadevātmako hyeṣa tejasvī raśmibhāvanaḥ.
   Eṣa devāsuragaṇān lokān pāti gabhastibhiḥ.
6. Eṣa brahmā cha viṣṇuścha śivaḥ skandaḥ prajāpatiḥ.
   Mahendro dhanadaḥ kālo yamaḥ somo hyapāṃ patiḥ.
7. Pitaro vasavaḥ sādhyā aśvinau maruto manuḥ.
   Vāyurvahniḥ prajāprāṇa ṛtukartā prabhākaraḥ.
8. Ādityaḥ savitā sūryaḥ khagaḥ pūṣā gabhastimān.
   Suvarṇasadṛśo bhānurhiraṇyaretā divākaraḥ.
9. Haridaśvaḥ sahasrārchiḥ saptasaptirmarīchimān.
   Timironmathanaḥ śaṃbhustvaṣṭā mārttaṇḍa aṃśumān.
10. Hiraṇyagarbhaḥ śiśirastapano bhāskaro raviḥ.
    Agnigarbho'diteḥ putraḥ śaṅkhaḥ śiśiranāśanaḥ.
11. Vyomanāthastamobhedī ṛgyajussāmapāragaḥ.
    Ghanavṛṣṭirapāṃ mitro vindhyavīthīplavaṅgamaḥ.
12. Ātapī maṇḍalī mṛtyuḥ piṅgalaḥ sarvatāpanaḥ.
    Kavirviśvo mahātejā raktaḥ sarvabhavodbhavaḥ.
13. Nakṣatragrahatārāṇāmadhipo viśvabhāvanaḥ.
    Tejasāmapi tejasvī dvādaśātmannamo'stute.
14. Namaḥ pūrvāya giraye paśchimāyādraye namaḥ.
    Jyotirgaṇānāṃ pataye dinādhipataye namaḥ.
15. Jayāya jayabhadrāya haryaśvāya namo namaḥ.
    Namo namaḥ sahasrāṃśo ādityāya namo namaḥ.

16. Namaḥ ugrāya vīrāya sāraṅgāya namo namaḥ.
Namaḥ padmaprabodhāya mārttaṇḍāya namo namaḥ.

17. Brahmeśānāchyuteśāya sūryāyādityavarchase.
Bhāsvate sarvabhakṣāya raudrāya vapuṣe namaḥ.

18. Tamoghnāya himaghnāya śatrughnāyāmitātmane.
Kṛtaghnaghnāya devāya jyotiṣāṃ pataye namaḥ.

19. Taptachāmīkarābhāya vahnaye viśvakarmaṇe.
Namastamo'bhinighnāya ruchaye lokasākṣiṇe.

20. Nāśayatyeṣa vai bhūtaṃ tadeva sṛjati prabhuḥ.
Pāyatyeṣa tapatyeṣa varṣatyeṣa gabhastibhiḥ.

21. Eṣa supteṣu jāgartti bhūteṣu pariniṣṭhitaḥ.
Eṣa evāgnihotraṃ cha phalaṃ chaivāgnihotriṇām.

22. Devāścha kratavaśchaiva kratūnāṃ phalameva cha.
Yāni kṛtyāni lokeṣu sarva eṣa raviḥ prabhuḥ.

23. Enamāpatsu kṛchchhreṣu kāntāreṣu bhayeṣu cha.
Kīrtayan puruṣaḥ kaśchinnāvasīdati rāghava.

24. Pūjayasvainamekāgro devadevaṃ jagatpatim.
Etat triguṇitaṃ japtvā yuddheṣu vijayiṣyasi.

Om śāntiḥ śāntiḥ śāntiḥ. Hariḥ om



Mṛtasañjīvanakavacham

1. Evamārādhya gaurīśaṃ devaṃ mṛtyuñjayeśvaram.
   Mṛtasañjīvanaṃ nāma kavachaṃ prajapet sadā.
2. Sārāt sārataraṃ puṇyaṃ guhyād guhyataraṃ śubhaṃ.
   Mahādevasya kavachaṃ mṛtasañjīvanābhidham.
3. Samāhitamanā bhūtvā śṛṇuṣva kavachaṃ śubham.
   Śrutvaitad divyakavachaṃ rahasyaṃ kuru sarvadā.
4. Jarābhayakaro yajvā sarvadevaniṣevitaḥ.
   Mṛtyuñjayo mahādevaḥ prāchyāṃ māṃ pātu sarvadā.
5. Dadhānaḥ śaktimabhayāṃ trimukhaḥ ṣaḍbhujaḥ prabhuḥ.
   Sadāśivoḍgnirūpī māmāgneyyāṃ pātu sarvadā.
6. Aṣṭādaśabhujopeto daṇḍābhayakaro vibhuḥ.
   Yamarūpī mahādevo dakṣiṇasyāṃ sadā'vatu.
7. Khaḍgābhayakaro dhīro rakṣogaṇaniṣevitaḥ.
   Rakṣorūpī maheśo māṃ nairṛtyāṃ sarvadā'vatu.
8. Pāśābhayabhujaḥ sarvaratnākaraniṣevitaḥ.
   Varuṇātmā mahādevaḥ paśchime māṃ sadā'vatu.
9. Gadābhayakaraḥ prāṇanāyakaḥ sarvadāgatiḥ.
   Vāyavyāṃ mārutātmā māṃ śaṅkaraḥ pātu sarvadā.
10. Śaṅkhābhayakarastho māṃ nāyakaḥ parameśvaraḥ.
    Sarvātmāntaradigbhāge pātu māṃ śaṅkaraḥ prabhuḥ.
11. Śūlābhayakaraḥ sarvavidyānāmadhināyakaḥ.
    Īśānātmā tathaiśānyāṃ pātu māṃ parameśvaraḥ.
12. Ūrdhvabhāge brahmarūpī viśvātmā'dhaḥ sadā'vatu.
    Śiro me śaṅkaraḥ pātu lalāṭaṃ chandraśekharaḥ.
13. Bhrūmadhyaṃ sarvalokeśa-strinetro'vatu lochane.
    Bhrūyugmāṃ giriśaḥ pātu karṇau pātu maheśvaraḥ.
14. Nāsikāṃ me mahādeva oṣṭhau pātu vṛṣadhvajaḥ.
    Jihvāṃ me dakṣiṇāmūrtirdantān me giriśo'vatu.
15. Mṛtyuñjayo mukhaṃ pātu kaṇṭhaṃ me nāgabhūṣaṇaḥ.
    Pinākī matkarau pātu triśūlī hṛdayaṃ mama.

16. Pañchavaktraḥ stanau pātu udaraṃ jagadīśvaraḥ.
Nābhiṃ pātu virūpākṣaḥ pārśve me pārvatīpatiḥ.

17. Kaṭidvayaṃ girīśo me pṛṣṭhaṃ me pramathādhipaḥ.
Guhyaṃ maheśvaraḥ pātu mamorū pātu bhairavaḥ.

18. Jānunī me jagaddhartā jaṅghe me jagadambikā.
Pādau me satataṃ pātu lokavandyaḥ sadāśivaḥ.

19. Girīśaḥ pātu me bhāryāṃ bhavaḥ pātu sutān mama.
Mṛtyuñjayo mamāyuṣyaṃ chittaṃ me gaṇanāyakaḥ.

20. Sarvāṅgaṃ me sadā pātu kālakālaḥ sadāśivaḥ.
Etatte kavachaṃ puṇyaṃ devatānāṃ cha durlabham.

21. Mṛtasañjīvanaṃ nāmnā mahādevena kīrtitam.
Sahasrāvartanaṃ chāsya puraścharaṇamīritam.

22. Yaḥ paṭhechchhṛṇuyānnityaṃ śrāvayet susamāhitaḥ.
So'kālamṛtyuṃ nirjitya sadāyuṣyaṃ samaśnute.

Om śāntiḥ śāntiḥ śāntiḥ. Hariḥ om



Śānti Pāṭh

Asato mā sadgamaya.
Tamaso mā jyotirgamaya.
Mṛtyormā'mṛtaṃ gamaya.
Sarveṣāṃ svastirbhavatu.
Sarveṣāṃ śāntirbhavatu.
Sarveṣāṃ pūrṇaṃ bhavatu.
Sarveṣāṃ maṅgalaṃ bhavatu.
Lokāḥ samastāḥ sukhino bhavantu.

Om tryambakaṃ yajāmahe sugandhiṃ puṣṭivardhanam.
Urvārukamiva bandhanāt mṛtyormukṣīya māmṛtāt.

Om śāntiḥ śāntiḥ śāntiḥ.

Tvameva mātā cha pitā tvameva
Tvameva bandhuścha sakhā tvameva.
Tvameva vidyā draviṇaṃ tvameva
Tvameva sarvaṃ mama devadeva.

Hariḥ om



Durgādvātriṃśannāmamālā

Om durgā durgārtiśamanī durgāpadvinivāriṇī.
Durgamachchhedinī durgasādhinī durganāśinī.

Durgatoddhāriṇī durganihantrī durgamāpahā.
Durgamajñānadā durga daityalokadavānalā.

Durgamā durgamālokā durgamātmasvarūpiṇī.
Durgamārgapradā durgamavidyā durgamāśritā.

Durgamajñānasaṃsthānā durgamadhyānabhāsinī.
Durgamohā durgamagā durgamārthasvarūpiṇī.

Durgamāsurasaṃhantrī durgamāyudhadhāriṇī.
Durgamāṅgī durgamatā durgamyā durgameśvarī.

Durgabhīmā durgabhāmā durgabhā durgadāriṇī.

Om śāntiḥ śāntiḥ śāntiḥ. Hariḥ om



Viṣṇukṛtaṃ Devīstotram

1. Namo devyai prakṛtyai cha vidhātryai satataṃ namaḥ.
Kalyāṇyai kāmadāyai cha vṛddhyai siddhyai namo namaḥ.

2. Sachchidānandarūpiṇyai saṃsārāraṇaye namaḥ.
Pañchakṛtyavidhātryai te bhuvaneśyai namo namaḥ.

3. Sarvādhiṣṭhānarūpāyai kūṭasthāyai namo namaḥ.
Ardhamātrārthabhūtāyai hṛllekhāyai namo namaḥ.

4. Jñātaṃ mayā'khilamidaṃ tvayi sanniviṣṭaṃ
Tvatto'sya sambhavalayāvapi mātaradya.
Śaktiścha te'sya karaṇe vitataprabhāvā
Jñātā'dhunā sakalalokamayīti nūnam.

5. Vistārya sarvamakhilaṃ sadasadvikāraṃ
Sandarśayasyavikalaṃ puruṣāya kāle.
Tattvaiścha ṣo'aśabhireva cha saptabhiścha
Bhāsīndrajālamiva naḥ kila rañjanāya.

6. Na tvāmṛte kimapi vastugataṃ vibhāti
Vyāpyaiva sarvamakhilaṃ tvamavasthitā'si.
Śaktiṃ vinā vyavahṛto puruṣo'pyaśakto
Bambhaṇyate janani buddhimatā janena.

7. Prīṇāsi viśvamakhilaṃ satataṃ prabhāvaiḥ
Svaistejasā cha sakalaṃ prakaṭīkaroṣi.
Astyeva devi tarasā kila kalpakāle
Ko veda devi charitaṃ tava vaibhavasya.

8. Trātā vayaṃ janani te madhukaiṭabhābhyāṃ
Lokāścha te suvitatāḥ khalu darśitā vai.
Nītāḥ sukhasya bhavane paramāṃ cha koṭiṃ
Yaddarśanaṃ tava bhavāni mahāprabhāvam.

9. Nāhaṃ bhavo na cha viriñchi viveda mātaḥ
Ko'nyo hi vetti charitaṃ tava durvibhāvyam.
Kānīha santi bhuvanāni mahāprabhāve
Hyasminbhavāni rachite rachanākalāpe.

10. Asmābhiratra bhuvane hariranya eva
Dṛṣṭaḥ śivaḥ kamalajaḥ prathitaprabhāvaḥ.
Anyeṣu devi bhuvaneṣu na santi kiṃ te
Kiṃ vidma devi vitataṃ tava suprabhāvam.

11. Yāche'mba te'ṅghrikamalaṃ praṇipatya kāmaṃ
Chitte sadā vasatu rūpamidaṃ tavaitat.
Nāmāpi vaktrakuhare satataṃ tavaiva
Sandarśanaṃ tava padāmbujayoḥ sadaiva.

12. Bhṛtyo'yamasti satataṃ mayi bhāvanīyaṃ
Tvāṃ svāminīti manasā nanu chintayāmi.
Eṣā''vayoraviratā kila devi bhūyā-
Dvyāptiḥ sadaiva jananīsutayorivārye.

13. Tvaṃ vetsi sarvamakhilaṃ bhuvanaprapañchaṃ
Sarvajñatā parisamāptinitāntabhūmiḥ.
Kiṃ pāmareṇa jagadamba nivedanīyaṃ
Yadyuktamāchara bhavāni taveṅgitaṃ syāt.

14. Brahmā sṛjatyavati viṣṇurumāpatiścha
Saṃhārakāraka iyaṃ tu jane prasiddhiḥ.
Kiṃ satyametadapi devi tavechchhayā vai
Kartuṃ kṣamā vayamaje tava śaktiyuktāḥ.

15. Dhātrī dharādharasute na jagad bibharti
Ādhāraśaktirakhilaṃ tava vai bibharti.
Sūryo'pi bhāti varade prabhayā yutaste
Tvaṃ sarvametadakhilaṃ virajā vibhāsi.

16. Brahmā'hamīśvaravaraḥ kila te prabhāvā-
Tsarve vayaṃ janiyutā na yadā tu nityāḥ.
Ke'nye surāḥ śatamakhapramukhāścha nityā
Nityā tvameva jananī prakṛtiḥ purāṇā.

17. Tvaṃ chedbhavāni dayase puruṣaṃ purāṇaṃ
Jāne'hamadya tava sannidhigaḥ sadaiva.
Nochedahaṃ vibhuranādiranīha īśo
Viśvātmadhīriti tamaḥprakṛtiḥ sadaiva.

18. Vidyā tvameva nanu buddhimatāṃ narāṇāṃ
Śaktistvameva kila śaktimatāṃ sadaiva.
Tvaṃ kīrtikāntikamalāmalatuṣṭirūpā
Muktipradā viratireva manuṣyaloke.

19. Gāyatryasi prathamavedakalā tvameva
Svāhā svadhā bhagavatī saguṇārdhamātrā.
Āmnāya eva vihito nigamo bhavatyā
Sañjīvanāya satataṃ surapūrvajānām.

20. Mokṣārthameva rachayasyakhilaṃ prapañchaṃ
Teṣāṃ gatāḥ khalu yato nanu jīvabhāvam.
Aṃśā anādinidhanasya kilānaghasya
Pūrṇārṇavasya vitatā hi yathā taraṅgāḥ.

21. Jīvo yadā tu parivetti tavaiva kṛtyaṃ
Tvaṃ saṃharasyakhilametaditi prasiddham.
Nāṭyaṃ naṭena rachitaṃ vitathe'ntaraṅge
Kārye kṛte viramase prathitaprabhāvā.

22. Trātā tvameva mama mohamayādbhavābdhe-
Stvāmambike satatamemi mahārtide cha.
Rāgādibhirvirachite vitathe kilānte
Māmeva pāhi bahuduḥkhakare cha kāle.

23. Namo devi mahāvidye namāmi charaṇau tava.
Sadā jñānaprakāśaṃ me dehi sarvārthade śive.

Om śāntiḥ śāntiḥ śāntiḥ. Hariḥ om



Śrīrāmakṛtā Kātyāyanīstutiḥ

1. Namaste trijagadvandye saṅgrāme jayadāyini.
   Prasīda vijayaṃ dehi kātyāyani namo'stu te.
2. Sarvaśaktimaye duṣṭaripunigrahakāriṇī.
   Duṣṭajṛmbhiṇi saṅgrāme jayaṃ dehi namo'stu te.
3. Tvamekā paramā śaktiḥ sarvabhūteṣvavasthitā.
   Duṣṭaṃ saṃhara saṅgrāme jayaṃ dehi namo'stu te.
4. Raṇapriye raktabhakṣe māṃsabhakṣaṇakāriṇi.
   Prapannārtihare yuddhe jayaṃ dehi namo'stu te.
5. Khaṭvāṅgāsikare muṇḍamālādyotitavigrahe.
   Ye tvāṃ smaranti durgeṣu teṣāṃ duḥkhaharā bhava.
6. Tvatpādapaṅkajāddainyaṃ namaste śaraṇapriye.
   Vināśaya raṇe śatrūn jayaṃ dehi namo'stu te.
7. Achintyavikrame'chintyarūpasaundaryaśālini.
   Achintyacharite'chintye jayaṃ dehi namo'stu te.
8. Ye tvāṃ smaranti durgeṣu devīṃ durgavināśinīm.
   Nāvasīdanti durgeṣu jayaṃ dehi namo'stu te.
9. Mahiṣāsṛkpriye saṅkhye mahiṣāsuramardini.
   Śaraṇye girikanye me jayaṃ dehi namo'stu te.
10. Prasannavadane chaṇḍi chaṇḍāsuravimardini.
    Saṅgrāme vijayaṃ dehi śatrūñjahi namo'stu te.
11. Raktākṣi raktadaśane raktacharchitagātrake.
    Raktabījanihantrī tvaṃ jayaṃ dehi namo'stu te.
12. Niśumbhaśumbhasaṃhantri viśvakartri sureśvari.
    Jahi śatrūn raṇe nityaṃ jayaṃ dehi namo'stu te.
13. Bhavānyetajjagatsarvaṃ tvaṃ pālayasi sarvadā.
    Rakṣa viśvamidaṃ mātarhatvaitān duṣṭarākṣasān.
14. Tvaṃ hi sarvagatā śaktirduṣṭamardanakāriṇi.
    Prasīda jagatāṃ mātarjayaṃ dehi namo'stu te.
15. Durvṛttavṛndadamani sadvṛttaparipālini.
    Nipātaya raṇe śatrūñjayaṃ dehi namo'stu te.
16. Kātyāyani jaganmātaḥ prapannārtihare śive.
    Saṅgrāme vijayaṃ dehi bhayebhyaḥ sarvadā.

Om śāntiḥ śāntiḥ śāntiḥ. Hariḥ om

Pāṇḍavākṛtā Kātyāyanīstutiḥ

1. Kātyāyani tridaśavanditapādapadme
   Viśvodbhavasthitilayaikanidānarūpe.
   Devī prachaṇḍadalini tripurāripatni
   Durge prasīda jagatāṃ paramārtihantri.

2. Tvaṃ duṣṭadaityavinipātakarī sadaiva
   Duṣṭapramohanakarī kila duḥkhahantrī.
   Tvāṃ yo bhajediha jaganmayi taṃ kadāpi
   No bādhate bhavasu duḥkhamachintyarūpe.

3. Tvāmeva viśvajananīṃ praṇipatya viśvaṃ
   Brahmā sṛjatyavati viṣṇurahotti śambhuḥ.
   Kāle cha tānsṛjasi pāsi vihaṃsi mātaḥ
   Tvallīlayaiva nahi te'sti janairvināśaḥ.

4. Tvaṃ yaiḥ smṛtā samaramūrdhani duḥkhahantri
   Teṣāṃ tanūnnahi viśanti vipakṣabāṇāḥ.
   Teṣāṃ śarāstu paragātranimagnapuṅkhāḥ
   Prāṇāngrasanti danujendranipātakartri.

5. Yastvanmanuṃ japati ghoraraṇe sudurge
   Paśyanti kālasadṛśaṃ kila taṃ vipakṣāḥ.
   Tvaṃ yasya vai jayakarī khalu tasya vaktrād
   Brahmākṣarātmakamanustava niḥsarechcha.

6. Tvāmāśrayanti parameśvari ye bhayeṣu
   Teṣāṃ bhayaṃ nahi bhavediha vā paratra.
   Tebhyo bhayādiha sudūrata eva duṣṭāḥ
   Trastāḥ palāyanaparāścha diśo dravanti.

7. Pūrve surāsuraraṇe suranāyakastvāṃ
   Samprārthayannasuravṛndamupājaghāna.
   Rāmo'pi rākṣasakulaṃ nijaghāna tadvat
   Tvatsevanādṛta ihāsti jayo na chaiva.

8. Tattvāṃ bhajāmi jayadāṃ jagadekavandyāṃ
   Viśvāśrayāṃ harivirañchisusevyapādām.
   Tvaṃ no vidhehi vijayaṃ tvadanugraheṇa
   Śatrūnnipātya samare vijayaṃ labhāmaḥ.

Om śāntiḥ śāntiḥ śāntiḥ. Hariḥ om

Trailokyamaṅgala-kumārīkavacham

1. Praṇavo me śiraḥ pātu māyā sandāyikā satī.
   Lalāṭordhvaṃ mahāmāyā pātu me śrīsarasvatī.
2. Kāmākṣā vaṭukeśānī trimūttirbhālameva me.
   Chāmuṇḍā bījarūpā cha vadanaṃ kālikā mama.
3. Pātu māṃ sūryagā nityaṃ tathā netradvayaṃ mama.
   Karṇayugmaṃ kāmabījaṃ svarūpomātapasvinī.
4. Rasanāgraṃ tathā pātu vāgdevī mālinī mama.
   Ḍāmarasthā kāmarūpā dantāgraṃ kuṅjikā mama.
5. Devī praṇavarūpā'sau pātu nityaṃ śivā mama.
   Oṣṭhādharaṃ śaktibījātmikā svāhāsvarūpiṇī.
6. Pāyānme kālasandaṣṭā pañchavāyusvarūpiṇī.
   Galadeśaṃ mahāraudrī pātu me chāparājitā.
7. Kṣauṃ bījaṃ me tathā kaṇṭhaṃ rudrāṇī svāhayānvitā.
   Hṛdayaṃ bhairavī vidyā pātu ṣo'aśa susvarā.
8. Dvau bāhū pātu sarvatra mahālakṣmīḥ pradhānikā.
   Sarvamantrasvarūpaṃ me chodaraṃ pīṭhanāyikā.
9. Pārśvayugmaṃ tathā pātu kumārī vāgbhavātmikā.
   Kaiśorī kaṭideśaṃ me māyābījasvarūpiṇī.
10. Jaṅghāyugmaṃ jayantī me yoginī kullukāyutā.
    Sarvāṅgamambikādevī pātu mantrārthagāminī.
11. Keśāgraṃ kamalādevī nāsāgraṃ vindhyavāsinī.
    Chibukaṃ chaṇḍikā devī kumārī pātu me sadā.
12. Hṛdayaṃ lalitā devī pṛṣṭhaṃ parvatavāsinī.
    Triśaktiḥ ṣo'aśī devī liṅga guhyaṃ sadāvatu.
13. Śmaśāne chāmbikā devī gaṅgāgarbhe cha vaiṣṇavī.
    Śūnyāgāre pañchamudrā mantrayantraprakāśinī.
14. Chatuṣpathe tathā pātu māmeva vajradhāriṇī.
    Śavāsanagatā chaṇḍā muṇḍamālāvibhūṣitā.
15. Pātu māne kaliṅge cha vaikharī śaktirūpiṇī.
    Vane pātu mahābālā mahāraṇye raṇapriyā.

16. Mahājale taḍāge cha śutrumadhye sarasvatī.
Mahākāśapathe pṛthvī pātu māṃ śītalā sadā.

17. Raṇamadhye rājalakṣmīḥ kumārī kulakāminī.
Arddhanārīśvarā pātu mama pādatalaṃ mahī.

18. Navalakṣamahāvidyā kumārī rūpadhāriṇī.
Koṭisūryapratīkāśā chandrakoṭisuśītalā.

19. Pātu māṃ varadā vāṇī vaṭukeśvarakāminī.
Iti te kathitaṃ nātha kavachaṃ paramādbhutam.

Om śāntiḥ śāntiḥ śāntiḥ. Hariḥ om



Śrī-durgāmahimnaḥ Stotram

1. Tvamantastvaṃ paśchāt tvamasi puratastvaṃ cha parataḥ
   Tvamūrdhvaṃ tvaṃ chādhastvamasi khalu lokāntara charī.
   Tvamindrastvaṃ chandrastvamasi nigamānāmupaniṣat
   Tavāhaṃ dāso'smi tripurahararāme kuru kṛpām.

2. Iyān kālaḥ sṛṣṭheḥ prabhṛti bahukaṣṭena gamito
   Vinā yat tvatsevāṃ karuṇarasakalloliniśive.
   Tadetad daurbhāgyaṃ mama viṣayatṛṣṇākhya ripuṇā
   Hataḥ śuddhānandaṃ spṛśimi tava siddheśvari padam.

3. Sudhādhārāvṛṣṭeḥ tava janani dṛṣṭerviṣayatām
   Vayaṃ yāmo dāmodara bhagini bhāgyena phalitam.
   Idānīṃ bhūtānāṃ dhruvamupari bhūtaḥ paramudā
   Na vāñchhāmo mokṣaṃ vipinapathi kakṣaṃ jaradiva.

4. Japādau no saktā haragṛhiṇi bhaktāḥ karuṇayā
   Bhavatyā homatyā katikati na bhāvena gamitāḥ.
   Chidānandākāraṃ bhavajaladhipāraṃ nijapadam
   Na te māturgarbhe janani tava garbhe yadi gatāḥ.

5. Chidevedaṃ sarvaṃ śrutiriti bhavatyāḥ stutikathā
   Priyaṃ bhātyastīti trividhamapi rūpaṃ tava śive.
   Aṇurdīrghaṃ hrasvaṃ mahadajaramantādirahitam
   Tvameva brahmāsi tvadaparamudāraṃ na girije.

6. Tvayā'ntaryāminyā bhagavati vaśinyādisahite
   Vidhīyante bhāvo manasi jagatāmityupaniṣat.
   Ahaṃ kartetyantarviśatu mama buddhiḥ kathamume
   Subuddhistvadbhakto na bhavati kubuddhiḥ kvachidapi.

7. Na mantraṃ tantraṃ vā kimapi khalu vidmo girisute
   Kva yāmaḥ kiṃ kurmastava charaṇasevā na rachitā.
   Aye mātaḥ prātaḥ prabhṛti divasāstāvadhi vayam
   Kubuddhyā'haṅkārye śiva śiva na yāmo nijavayaḥ.

8. Ihāmuṣmin loke hyapi na viṣaye premakara vai
   Na me vairī kaśchid bhagavati bhavāni tribhuvane.
   Guṇānnāmādhāraṃ nigamagaṇasāraṃ tava padam
   Mano vāraṃ vāraṃ japati cha vinodaṃ cha bhajate.



9. Mahāmāye kāye mama bhavati yādṛkkhalu mano
Manaste saṅkhyāne na hi bhavati tādṛk kathamume.
Tvamevāntarmātarnigamayasi buddhiṃ trijagatām
Na jāne śrījānerapi na viditaste'tra mahimā.

10. Amīṣāṃ varṇānāṃ kratukaraṇasampūrṇavayasām
Nikāmyaṃ kāvyānāmurasi samudāyaṃ prakaṭitam.
Stanau merū matvā sthagitamamṛtopākhyamubhayam
Dayādhārādhāraṃ mama janani hāraṃ tava bhaje.

11. Stanadvandvaṃ skandadvipamukhamukhe yat snutamukham
Kadāchinme mātarvitaratu mukhe stanyakaṇikām.
Anenāyam dhanyo jagadupari mānyo'pi bhavatām
Kuputre satputre na hi bhavati māturviṣamatā.

12. Jaganmūlaṃ śūlaṃ hyanubhavati kūlaṃ kathamidam
Dvidhā kurve sarveśvari mama tu garveṇa phalitam.
Padadvandvaṃ dvandvaṃvyatikaraharaṃ dvandvasukhadam
Guṇārāme rāme kalaya hṛdi kāmeśvari sadā.

13. Ahorātraṃ gātraṃ samajani na pātraṃ mama mudā
Dhanāyattaṃ chittaṃ tṛṇamapi tu niśchintamabhavat.
Idānīmānītā kathamapi bhavānī hṛdi mayā
Sthitaṃ manye dhanye pathi kathamadhanye'hamuchitaḥ.

14. Nirākārāmārādadhi hṛdayamārādhitavatā
Mayā māyātītā sitasakalakāyāpahataye.
Ahaṃ ko'haṃ so'haṃ matiriti vimohaṃ hatavati
Kṛtā hantānantāmupanayati santānakavati.

15. Tvadaṅghreruddyotādaruṇakiraṇaśreṇigamanāt
Samudbhūtā ye ye jagati jayinaḥ śoṇamaṇayaḥ.
Ta ete sarveṣāṃ śirasi viduṣāṃ bhānti bhuvane
Tvadīyādanyaḥ ko bhavati janavandyo'dya girije.

16. Akārṣīt so'marṣī bhuvanamaparaṃ gādhitanayaḥ
Śaśāpānyo lakṣmīmapibadaparo hyarṇavamiti.
Saparyāmāhātmyaṃ tava janani tādātmyaphaladam
Kiyad vakṣye yakṣeśvarakiraṇadattaṃ bhagavati.

17. Amī devāḥ sevāṃ vidadhati yato mañchakatayā
Śivo'pyachchhachchhāyā rachitaruchiraprachchhadatayā.
Kṛtārthī kartuṃ māṃ paramaśiva vāmāṅkanilayā
Parabrahmasphūrtistava jayati mūrtiḥ sakaruṇā.

18. Samuddhartuṃ bhaktān prabhavati vihartuṃ jagadidam
Gatiṃ vāyorbaddhvā vinimayati rūpaṃ cha niyamāt.
Yadṛchchhā yasyechchhā na cha bhajana vichchheda bhayato
Namaste bhaktāya dhruvabhajanasaktāya girije.

19. Umā māyā mātā kamalanayanā kṛṣṇabhaginī
Bhavānī durgā'mbā matiramaralakṣmīti taralā.
Mahāvidyā devī prakṛtirajajāyeti japatām
Bhavanti śrīvidye tava janani nāmāni nidhayaḥ.

20. Diśāṃ pālā bālā haraharisarojāsanamukhāḥ
Tvayā durge sarve kati kati na bhaktā adhikṛtāḥ.
Svayaṃ raktā bhaktāvahamadhikṛto nādhimagamam
Sukhe vā duḥkhe vā mama samatayā yāntu divasāḥ.

21. Bhavatyā bhaktānāṃ yadi kimapi kaśchid vidhikṛte
Puro vā paśchād vā kapaṭaduriteṣāṃ para vaśaḥ.
Janaśchet sannyāsādapi japati nārāyaṇapadam
Tato'pyenaṃ devī nayanapathavīthīṃ gamayati.

22. Kriyā vā karttā vā karaṇamapi vā karma yadi vā
Praṇīyante cheṣṭā jagati puruṣairbhāvakaluṣaiḥ.
Samarpya svātmānaṃ tava tu padayorindrapadavīm
Idaṃ vā tad viṣṇorgaṇayati na bhakto'yamachalaḥ.

23. Svayaṃ māyā kāryādyudayakaraṇe kautukavatī
Śivādīnāṃ sargasthitivilayakarmāṇi bibhṛṣe.
Ayaṃ bhakto nāmnā bhagavati śubhaḥ syāt tava yadā
Bhavānyāḥ bhaktānāmaśubhamaparaṃ te'pi na kṛtam.

24. Dharitrī hyambhodhistvamapi dahanastvaṃ cha pavanaḥ
Tvamākāśastvaṃ cha grasati puruṣastena sahitam.
Grasantī brahmāṇḍaṃ prakṛtirapi dāsī paṣupateḥ
Yadāsīt saṃhāre janani tava saṃhāra mahimā.

25. Sphurattārā mālyaṃ grahanivahanīrājanavidhiḥ
Havirdhūmo dhūpo malayapavamānaḥ parimalaḥ.
Idaṃ te naivedyaṃ vividharasavedyaṃ khalu sukham
Saparyāmaryādā dhruvamiyamume brahmanilaye.

26. Navādhārā sṛṣṭiḥ sphuṭita navadhā śabdarachanā
Navānāṃ kheṭānāmupari navadhā'pyarchitapade.
Navānāṃ saṅkhyānāṃ prakṛtiragarājanya tanaye
Navadvīpī devī tvamasi navachakreśvari śive.

27. Yadā'kṛṣyākṛṣyā tapati bhavadambā kva nu gatā
Balātkārādārāditi yamabhaṭhe nāma vidhayā.
Tadaivainaṃ dīnaṃ spṛśati vadane praśrayavatī
Vidhūyāmbā dhūrtaṃ guhamapi dhayantaṃ bhagavatī.

28. Havirdhāne gītaṃ śrutiśirasi nirdhāritamitam
Śivasyārdhāṅgasthaṃ parama mahadaddhā mama manaḥ.
Yadā''chakṣāṇaste charaṇatalalākṣārasajalaiḥ
Mukhaṃ prakṣālyāyaṃ gaṇayati na lakṣāṇi kṛtinām.

29. Gurūṇāṃ sarveṣāmayamupari vidyā gururabhūt
Manūnāṃ sarveṣāmayamupari jāto bhuvamanuḥ.
Kalānāṃ sarvāsāmiyamupari lakṣmīḥ parakalā
Mahimnāṃ sarveṣāmayamupari jāgarti mahimā.

30. Yadā''lāpādāpāditavividhavidyāpariṇatiḥ
Kare kṛtvā mokṣaṃ vyavaharati lokaṃ prabhutayā.
Praṇādevāśā ye prabhavati durāpe cha puruṣaḥ
Tadetanmāhātmyaṃ viralajanasātmyaṃ tava śive.

31. Yābhiḥ śaṅkarakālakṛtyadahanajvālā samutsāraṇam
Yābhiḥ śumbhaniśumbhadarpadalanaṃ yābhirjaganmohanam.
Yābhirbhairavabhīmarūpadalanaṃ sadyaḥ kṛtaṃ me'nvaham
Dāridryaṃ dalayantu tāstava dṛśo durge dayāmedurāḥ.

32. Yābhirdurgatayā kuśāsana punaḥ svārājyadānaṃ kṛtam
Yābhirbhāratasaṃsadi drupadajā lajjā javādrakṣitā.
Yābhiḥ kṛṣṇagṛhītahastakamalaistrāṇaṃ kṛtaṃ me'nvaham
Dāridryaṃ dalayantu tāstava dṛśo durge dayāmedurāḥ.

33. Yābhirviṣṇukṛte kṛtaṃ kurukulapradhvaṃsanaṃ saṅgare
Prādyumnerhṛdi mudgarasya kusumastragyābhirākalpitā.
Kaṃsādyābhirapi vyadhāyi vasudhā gopālagopāyanam
Dāridryaṃ dalayantu tāstava dṛśo durge dayāmedurāḥ.

34. Yābhiḥ sthāvarajaṅgamaṃ kṛtamidaṃ yābhiḥ sadā pālitam
Yābhirbhāsitamākrameṇa cha punaryābhiḥ sadā saṃhṛtam.
Yābhirduḥkhamahāmbhaso bhavamahāsindhorna ke tāritā
Dāridryaṃ dalayantu tāstava dṛśo durge dayāmedurāḥ.

Om śāntiḥ śāntiḥ śāntiḥ. Hariḥ om





In January 2012, Swami Niranjanananda initiated a new sadhana at Ganga Darshan: the invocation of the Cosmic Goddess in the form of Mother Katyayani, the peace-bestowing force. Every morning, havan is performed and the ashram reverberates with the sound of invocatory chants, the thousand names of Ma Katyayani, and victory and protection mantras. The sadhana is a three-year sankalpa for the sannyasa training participants and is being performed under the aegis of Sannyasa Peeth.

This volume contains the stotras utilized in the sadhana, selected by Swami Niranjanananda. In the 'Introduction', Swamiji explains the purpose of the sadhana, and the articles by Swami Sivananda and Swami Satyananda take us closer to the Mother principle. The original verses in Devanagari and Roman transliteration are provided.



ISBN :978-93-81620-40-3